M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 1385

Title : Narsinh Saheba Nama

1385

In Complete

Narsinh Sahsra Nam (Narsinh Puran)			Title
			Author
			Editor
			Year, Vols.
			Publisher
1385		Pages 276	Remarks

नरैर्वज्रसमप्रभैः॥९॥ मेने नतार्थमात्मानं सर्वतः पर्यवेक्षत। हर्षिता देवताः सर्वाः
पुष्पवृष्टिमवाकिरन्॥१०॥ देवदुंदुभयो नेदुर्दिशश्च विमला नभन्॥ नसिंहं त्वति
तेजस्कं विद्युत्एविदनं च्छटां॥११॥ लेलिहानं वगर्जंतं कालानलसमप्रभं॥ अतिरौद्रं म
हाकायं महादंष्ट्रं महारुतं॥१२॥ महाजिह्वं महारूपं दृष्ट्वा संक्षुभितं जगत्॥ सर्वे देवग
णाः साइं तत्रागस्य पितामह॥१३॥ आगंतुकैर्त्रुतस्थैर्वे दर्शमानैः स्तुतैमैः। गुणैर्नामभ
स्त्वेतुष्टा वक्ष्यामि संमिते॥१४॥ ॐ श्रीमद्दिव्यलक्ष्मीनृसिंहायेति ज्ञानमुद्रां विधाय
ॐ यं यं यं ॐ रं रं रं ॐ वं वं वं ॐ हृदि जपित्वा॥ अस्य श्रीलक्ष्मीनृसिंहसहस्रनामस्तोत्रमंत्रराज
स्य ब्रह्मा ऋषिः। लक्ष्मीनृसिंहो देवता। अनुष्टुप् छंदः। श्रीनृसिंहः परमात्मा बीजं॥ लक्ष्मी
र्माया शक्तिः। जीवो बीजं। सरस्वती शक्तिः व्यंजनानि बीजानि। स्वराः शक्तयः॥ ॐ ह्रौं ऐं ह्रीं
बुचिंन्नाति इत्यवाघु बिअ

इति बीजं ॥ श्रीं श्रीं इति शक्तयः ॥ विक्रीणिनखदंष्ट्रायुधायेति कीलकं ॥ अकारादीति बी-
धकं ॥ श्रीलक्ष्मीनृसिंहप्रसादेन सर्वेष्टप्राप्त्यर्थं सर्वार्थसाधनाभिधे श्रीलक्ष्मीनृसिं-
हसहस्रनामस्तोत्रमंत्रराजजपमहं करिष्ये ॥ ॐ श्रीलक्ष्मीनृसिंहाय अंगुष्ठाभ्यां नमः ॥
ॐ वज्रनखाय तर्जनीभ्यां नमः ॥ ॐ महारुद्राय मध्यमाभ्यां नमः ॥ ॐ सर्वतोमुखाय अनामि-
काभ्यां नमः ॥ विकटास्याय कनिष्ठिकाभ्यां नमः ॥ ॐ वीराय करतलपृष्ठाभ्यां नमः ॥ ॐ श्री-
लक्ष्मीनृसिंहाय हृदयाय नमः ॥ ॐ वज्रनखाय शिरसे स्वाहा ॥ ॐ महारौद्राय शिखा- २५
यै वौषट् ॥ सर्वतोमुखाय कवचाय हुं ॥ विकटास्याय नेत्रत्रयाय वौषट् ॥ वीराय अस्त्रा-
य फट् ॥ अथ दिग्बंधः ॥ ॐ ऐंद्रीं दिशं सुदर्शनेन बध्नामि ॥ नमश्चक्राय स्वाहा ॥ आग्ने-
यीं दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा ॥ याम्यां दिशं सु० ॥ नैर्ऋतीं दिशं सु० ॥

वारुणीं दिशं सु० ॥ वायवीं दिशं सु० ॥ कौबेरीं दिशं सु० ॥ ऐशानीं दिशं सु० ॥ ऊर्ध्वां दिशं सु० ॥ अ-
धस्तां दिशं सु० ॥ अथ ध्यानं ॥ सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थलं योगारूढ-
मतिप्रसन्नवदनं भूषासहस्रोज्ज्वलं ॥ त्र्यक्षं चक्रपिनाकसाभयवरान् बिभ्राणमर्कच्छ-
विं छत्रीभूतफणींद्रमिंदुधवलं लक्ष्मीनृसिंहं भजे ॥१॥ उपास्महे नृसिंहाख्यं ब्रह्म वेदां-
तगोचरं ॥ भूयो लालितसंसारच्छेदहेतुं जगद्गुरुं ॥१६॥ ब्रह्मोवाच ॥ ॐ ह्रीं श्रीं ऐं नमो ना-
रसिंहाय वज्रदंष्ट्राय वज्रिणे ॥ वज्रदेहाय वज्राय नमो वज्रनखाय च ॥१७॥ वासुदेवा-
य वंद्याय वरदाय वरात्मने ॥ वरदाभयहस्ताय वराय वररूपिणे ॥१८॥ वरेण्याय वरि-
ष्ठाय श्रीवराय नमो नमः ॥ प्रह्लादवरदायैव प्रत्यक्षवरदाय च ॥१९॥ परात्परपरेशाय प-
वित्राय पिनाकिने ॥ पावनाय प्रसन्नाय पाशिने पापहारिणे ॥२०॥ पुरुष्टुताय पुण्या-

पशुरूढ्‌ताय ते नमः॥ तत्पुरुषाय तथ्याय पुराणपुरुषाय च॥२१॥ प्रमोदसेव्यचर्गाय ब्रह्म
राक्षाय ते नमः॥ शुभ्रहासाय हासाय महाहासाय शार्ङ्गिणे॥२२॥ सिताय सितपाजा
य जगद्रूपाय ते नमः॥ अट्टहासाय रौद्राय ज्वालावासाय ते नमः॥२३॥ भूतवासाय
भासाय भ्रान्तिवासाय खड्गिने॥ खड्गजिह्वाय सिताय खड्गवासाय वै नमः॥२४॥
नमो मूलाधिवासाय धर्मावासाय धन्विने॥ धनंजयाय धन्याय नमो मृत्युंजयाय च रिपु २५॥
ञ्जयाय सूत्राय नमः शत्रुंजयाय च॥ निरंजनाय निर्गुणाय सगुणाय च॥ निःप्रपंचा
य निर्वाणप्रदाय निर्विघ्नाय च॥ निरालंबाय नीलाय निष्कलाय कलाय च॥२६॥
निर्मेषाय निर्बंधाय निर्भवागमनाय च॥ निर्द्वन्द्वाय निराशाय निश्चयाय निरामयवरदा
निर्मलाय निर्बंधाय निर्मोहाय निराकृते॥ नमो नित्याय सत्याय सत्कर्मनिर

ताय च॥२८॥ सत्यध्वजाय मुंजाय मुंजकेशाय केशिने॥ हृषीकेशाय केशाय गुडाकेशाय
वै नमः॥३०॥ सुकेशायोर्ध्वकेशाय केशिसंहारकाय च॥ जलेशाय स्थलेशाय पद्मेशा
योग्ररूपिणे॥३१॥ कुमेशायायकूलाय केशवाय नमो नमः॥ भक्तिपूर्णाय सुज्ञाय
रक्तजिह्वाय रागिणे॥३२॥ दीप्तरूपाय दीप्ताय प्रदीप्ताय प्रलोभिने॥ प्रछन्नाय प्रबोधा
य प्रभवे विभवे नमः॥३३॥ प्रभंजनाय पांथाय प्रमाय प्रमिताय च॥ प्रकाशाय प्रता
पाय प्रज्वलायोज्ज्वलाय च॥३४॥ ज्वालमालास्वरूपाय ज्वलज्जिह्वाय ज्वलिने महोज्ज्व
लाय कालाय कालमूर्तिधराय च॥३५॥ कालांतकाय कल्पाय कलनाय कृते नमः॥ का
लचक्राय शक्राय षट्चक्राय च चक्रिणे॥३६॥ अक्रूराय कृतांताय विक्रमाय क्रमा
य च॥ कृत्तिने कृत्तिवासाय कृतिघ्नाय कृतात्मने॥३७॥ संक्रमाय वक्रुशाय क्रांत

न॰ सि॰ ६

लोकत्रयायच अरूपाय सुरूपाय हरये परमात्मने ॥३८॥ अजेयायादिदेवाय अन-
न्तायायच ॥ अघोराय सुघोराय घोरघोरतराय च ॥३९॥ नमोस्तु घोरवीर्याय लक्षोस्या-
यते नमः ॥ घोराध्यक्षाय दक्षाय दक्षिणाहविभुंजते ॥४०॥ अमोघाय सुगणोघाय
अनघायाघहारिणे ॥ मेघनादाय नादाय तुभ्यं मेघात्मने नमः ॥४१॥ मेघवाहनरू-
पाय मेघश्यामाय मालिने ॥ व्यालयज्ञोपवीताय व्याघ्रदेहाय वै नमः ॥४२॥ व्याघ्रा- ५॥
दायच व्याघ्रचर्मणे ॥ व्यापकायच विकृतास्याय वीराय विष्टरश्रवसे नमः ॥४३॥ विका-
नखदंष्ट्राय नखदंष्ट्रायुधाय च ॥ विष्वक्सेनाय सेनाय विह्वलाय बलाय च ॥४४॥
विरूपाक्षाय वीराय विशेषाक्षाय साक्षिणे ॥ वीतशोकाय विस्तीर्णवदनाय
नमो नमः ॥४५॥ विधानाय विधेयाय विजयाय जयाय च ॥ विबुधाय विभावाय

नमो विश्वंभराय च ॥४६॥ वीतरागाय विप्राय विटंकनयनाय च ॥ विपुलाय विनीताय विश्वयोने नमो नमः ॥४७॥
विदंबराय विज्ञाय विख्याताय वियोनये ॥ विह्वलाय विवाहाय नमो व्याहृतये सदा ॥४८॥ विलासाय विकल्पाय म-
हाकल्पाय ते नमः ॥ बहुकल्पाय कल्पाय कल्पातीताय शिल्पिने ॥४९॥ कल्पनाय स्वरूपाय फणितल्पाय वै नमः ।५०।
तडित्स्वनाय तार्क्ष्याय तरुणाय तरस्विने ॥ तपनाय तरक्षाय तापत्रयहराय च ॥ तारकाय तमोघ्नाय तत्वाय
च तपस्विने ॥५१॥ तक्षकाय तनुत्राय तटिने तरलाय च ॥ शतरूपाय शांताय शतधाराय ते नमः ॥५२॥
शतपत्राय ताक्ष्याय स्थितये शतमूर्तये ॥ शतक्रतुस्वरूपाय शाश्वताय शतात्मने ॥५३॥ नमः
सहस्रशिरसे सहस्रवदनाय च ॥ सहस्राक्षाय देवाय दिशाःश्रोताय ते नमः ॥५४॥ नमः सहस्र-
जिह्वाय महाजिह्वाय वै नमः ॥ सहस्रनामधेयाय सहस्राक्षिधराय च ॥५५॥ सहस्रबाहवे
तुभ्यं सहस्रचरणाय च ॥ सहस्रार्कप्रकाशाय सहस्रायुधधारिणे ॥५६॥ नमः स्थूलाय सू-
क्ष्माय सुसूक्ष्माय नमो नमः ॥ सुक्षीणाय सुनासाय सुराध्यक्षाय शौरिणे ॥५७॥ धर्मा-

धर्माध्यक्षायधर्मायलोकाध्यक्षायवैनमः॥प्रजाध्यक्षायशिक्षायविपक्षक्षयमूर्तये॥५८॥का
लाध्यक्षायतीक्ष्णायमूलाध्यक्षायतेनमः॥अधोक्षजायमित्रायसुमित्रावरुणायच॥५९॥
शत्रुघ्नायअविघ्नायविघ्नकोटिहरायच॥रक्षोघ्नायमहाघ्नायभूतघ्नायनमोनमः॥६०॥भू
तपालायभूतायभूतावासायभूतिने॥भूतवेतालघातायभूताधिपतयेनमः॥६१॥भू
तग्रहविनाशायभूतसंयमिनेनमः॥महाभूतायभृगवेसर्वभूतात्मनेनमः॥६२॥सर्वा ५॥
रिष्टविनाशायसर्वसंपत्करायच॥सर्वाधारायसर्वायसर्वार्तिहरयेनमः॥६३॥सर्वदुःखप्रशां रन
तायसर्वसौभाग्यदायिने॥सर्वज्ञायअनंतायसर्वशक्तिधरायच॥६४॥सर्वैश्वर्यप्रदात्रे
चसर्वकार्यविधायिने॥सर्वज्वरविनाशायसर्वरोगापहारिणे॥६५॥सर्वाभिचारहंत्रेच
सर्वैश्वर्यविधायिने॥पिंगाक्षायैकशृंगायद्विशृंगायमरीचये॥६६॥बहुशृंगायलिंगायमहा

शृंगायतेनमः॥~~मांगल्यायमनोज्ञायमंतव्यायमहात्मनेनमः~~॥मांगल्यायमनोज्ञायमंतव्यायम
हात्मने॥६७॥महादेवायमहेशायमातुलिंगधरायच॥महामायाप्रसूतायमायिनेजलशा
यिने॥६८॥महोदरायमंदायमदहायमदायच॥मधुकैटभहंत्रेचमाधवायमुरारये॥६९॥
महावीर्यायधैर्यायचित्रवीर्यायतेनमः॥चित्रकूर्मायचित्रायनमस्तेचित्रभानवे॥७०॥
मायातीतायमायायमहावीरायतेनमः॥महातेजायबीजायतेजोधाम्नेचबीजिने॥
७१॥तेजोमयनृसिंहायनमस्तेतेजसांनिधे॥महादंष्ट्रायदंष्ट्रायनमःपुष्टिकरायच॥
७२॥शिपिविष्टाययष्टायपरायपरमेष्ठिने॥विशिष्टायचशिष्टायगरिष्टायेष्टदायिने॥
७३॥नमोज्येष्ठायश्रेष्ठायतुष्टायामिततेजसे॥अष्टांगन्यस्तरूपायसर्वदुष्टांतकायच॥
७४॥वैकुंठायविकुंठायकेशिकंठायतेनमः॥कंठीरवायलुंठायनिःशठायहठायच॥७५॥

न सिं॰ सहस्र

वेधसे तेजसां निधये

सत्वोद्रिक्ताय रुद्राय रजोद्रिक्ताय रुद्राय स्रग्यजुःसामगाय च ॥७६॥ सत्वधनाय रुच्याय मंत्र
राजाय मंत्रिणे ॥ त्रिनेत्राय त्रिवर्गाय त्रिधाम्ने च त्रिशूलिने ॥७७॥ त्रिकालज्ञानरूपाय
त्रिदेहाय त्रिधात्मने ॥ नमस्त्रिमूर्त्तिविद्याय त्रितत्वज्ञानिने नमः ॥७८॥ अक्षोभ्यायाति
रुद्राय अप्रमेयाय भानवे ॥ अमृताय अनंताय अनिशायामराय च ॥७९॥ अपमृ
त्युविनाशाय अपस्मारविघातिने ॥ अन्नदायान्नरूपाय अन्नायान्नभुजे नमः ॥८०॥ अ ६॥
नाद्याय निरवद्याय विद्यायाद्भुतकर्म्मणे ॥ सद्योजाताय संध्याय वैद्युताय नमो नमः
॥८१॥ अध्यातीताय सत्वाय वागतीताय वाग्मिने ॥ वागीश्वराय गोपाय गोहिताय गवां
पते ॥८२॥ गंधर्वाय गजारये गर्जिताय गोर्जिताय च ॥ पर्जन्याय प्रबुद्धाय प्रधानपुरुषा
य च ॥८३॥ पद्मगर्भाय सुनाभाय पद्मनाभाय भासिने ॥ पद्मनेत्राय पद्माय पद्मा

याःपतये नमः ॥८४॥ पद्मोदराय पूताय पद्मकल्पोद्भवाय च ॥ नमो हृत्पद्मवासाय भूपद्मोद्ध
रणाय च ॥८५॥ शब्दब्रह्मस्वरूपाय ब्रह्मरूपधराय च ॥ ब्रह्मणे ब्रह्मरूपाय ब्रह्मनेत्रे नमो
नमः ॥८६॥ ब्रह्मादये ब्राह्मणाय ब्रह्मब्रह्मात्मने नमः ॥ सुब्रह्मण्याय देवाय ब्रह्मण्याय त्रि
वेदिने ॥८७॥ परब्रह्मस्वरूपाय पंचब्रह्मात्मने नमः ॥ नमस्ते ब्रह्मशिरसे तथाश्वशिरसे न
मः ॥८८॥ अथर्वशिरसे नित्यमशनिप्रतिमाय च ॥ नमस्ते तीक्ष्णदंष्ट्राय लोलाय ललिता
य च ॥८९॥ लावण्याय लचित्राय नमस्ते नाटकाय च ॥ लक्षणज्ञाय लक्ष्याय लक्षणाय
नमो नमः ॥९०॥ रसज्ञाय रसिज्ञाय विल्वे च प्रत्नविल्लवे ॥ हृत्सिमूलाय ह्लीमाय ह्री
मत्तचित्ते च नमः ॥[illegible]॥ परपाप्मित्त्वौ महत्सिद्धेहारिणे वनमालिने ॥ किरीटिने कुंडलि
ने सर्वजिते सर्वतोमुखे ॥९३॥ सर्वतःपाणिपादाय सर्वतोक्षिशिरोमुखे ॥ सर्वेश्वरं

सर्वदा तुष्टं सत्यथं समरप्रियं ॥२३॥ बहुयोजन विस्तीर्णं बहुयोजनमायतं ॥ बहुयोजनहस्तां
घ्रिं बहुयोजननासिकं ॥२४॥ महारूपं महावक्त्रं महादंष्ट्रं महाभुजं ॥ महानादं महारौद्रं महा
कायं महाबलं ॥२५॥ आनाभेर्ब्रह्मणोरूपमागलाद्वैष्णवं तथा ॥ आशीर्षाद्रुद्रमीशानं त
दग्ने सर्वतः शिवं ॥२६॥ नमोस्तु नारायणे नारसिंह नमोस्तु नारायणे वीरसिंह ॥ नमो
स्तु नारायणे क्रूरसिंह नमोस्तु नारायणे दिव्यसिंह ॥२७॥ नमोस्तु नारायणे व्याघ्रसिंह ७॥
नमोस्तु नारायणे पुच्छसिंह ॥ नमोस्तु नारायणे पूर्णसिंह नमोस्तु नारायणे रौद्रसिंह ॥२८
नमो नमो नायणे नडसिंह नमो नमो विह्वलनेत्रसिंह ॥ नमो नमो हेहितनूतसिंह नमो
नमो निर्मलचित्तसिंह ॥२९॥ नमो नमो निर्जितकालसिंह नमो नमः कल्पितकल्पसिं
ह ॥ नमो नमः कामदकामसिंह नमो नमस्ते भुवनैकसिंह ॥१००॥ द्यावापृथिव्यो

रिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ॥ दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथि
तं महात्मन् ॥११॥ अमी हि त्वां सुरसंघा विशन्ति केचिद्भीताः प्रांजलयो गृणन्ति ॥ स्वस्तीत्युक्त्वा
महर्षिसिद्धसंघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥१२॥ रुद्रादित्या वसवो ये च साध्या
विश्वेश्विनौ मरुतश्चोष्मपाश्च गंधर्वयक्षासुरसिद्धसंघा वीक्षन्ते त्वां विस्मिताश्
चैव सर्वे ॥१३॥ लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥ ते
जोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥१४॥ त्वं विष्णुस्त्वं सहिष्णुस्त्वं
वाजिष्णुर्जिष्णुरेव च ॥ पृथ्वी त्वमन्तरिक्षं त्वं सर्वं नारायण त्वमेव च ॥१५॥ कला काष्ठा वि
लिप्तास्त्वं मुहूर्तं प्रहरादिकं ॥ अहोरात्रं त्रिसंध्यं च पक्षमासर्तुवत्सरा ॥१६॥ युगादि
युगभेदस्त्वं संयुगो युगसंधयः ॥ नित्यं नैमित्तिकं दैन्यं महाप्रलय एव च ॥१७॥ ब्रह्मां

कारणं कर्ता च भर्ता च हर्ता त्वमीश्वरः ॥ सत्कर्ता सत्कृतिर्गोप्ता सच्चिदानंदविग्रहः ॥ १०८ ॥ प्राणस्त्वं प्रा
ता णिनां प्रेयमानस्त्वं सर्वदेहिनां ॥ सुज्योतिस्त्वं परंज्योतिरात्मज्योतिः सनातनः ॥ १०९ ॥ ज्यो
तिर्लोकस्वरूपस्त्वं ज्योतिर्ज्योतिषांपतिः ॥ स्वाहाकारः स्वधाकारो वषट्कारः कृपाकरः ॥
११० ॥ हंतकारो निराकारो वेगाकारश्च शंकरः ॥ अकारादिहकारांत ॐकारो लोककारकः ॥ ८॥
१११ ॥ एकात्मा त्वमनेकात्मा चतुरात्मा चतुर्भुजः ॥ चतुर्मूर्तिश्चतुर्दंष्ट्रश्चतुर्वेदमयोत्तमः ॥
११२ ॥ लोकप्रियो लोकगुरुर्लोकेशो लोकनायकः ॥ लोकसाक्षी लोकपतिर्लोकात्मा लोक
लोचनः ॥ ११३ ॥ लोकाधारो बृहल्लोको लोकालोकमयो विभुः ॥ लोककर्ता विश्वकर्ता कृताव
र्तः कृतागमः ॥ ११४ ॥ अनादिस्त्वमनंतस्त्वमभूतो भूतविग्रहः ॥ स्तुतः स्तव्यः स्तवप्रीतः स्तो
ता नेता नियामकः ॥ ११५ त्वं गतिस्त्वं मतिर्मह्यं पिता माता गुरुः सखा सुहृदश्चात्म

रूपस्त्वं त्वां विना नास्ति मे गतिः ॥ ११६ ॥ नमस्ते मंत्ररूपाय अस्त्ररूपाय ते नमः ॥ बहुरू
पाय रूपाय पंचरूपधराय च ॥ ११७ ॥ नदरूपाय रूढाय योगरूपाय योगिने ॥ समरू
पाय [illegible] रूपाय योगपीठस्थिताय च ॥ ११८ ॥ योगगम्याय सौम्याय ध्यानगम्याय
ध्यायिने ॥ ध्येयगम्याय धाम्ने च धामाधिपतये नमः ॥ ११९ ॥ धराधराय धर्माय धा
रणाभिरताय च ॥ नमो धात्रे विधात्रे संधात्रे च धराय च ॥ १२० ॥ दामोदराय दीनाय दान
य वांतकराय च ॥ नमः संसाचैघात्रेघ्नाय नमो नमः ॥ १२१ ॥ सारध्वजाय सीताय वातायप्र
मिताय च ॥ नारस्वताय संसारनाशनाय क्षमालिने ॥ १२२ ॥ असिचर्मधराय च षट्क र्म
निरताय च ॥ विकर्माय सुकर्माय परकर्मविघातिने ॥ १२३ ॥ सुशर्मिणे मन्मथाय नमो
मर्माय कर्मिणे ॥ करिचर्मवसानाय करालवदनाय च ॥ १२४ ॥ कवचये पद्मगर्भाय भूग

य मोघ्रणानिधेः अलगर्भाय गर्भाय हरिणर्भाय धूर्जटे ॥१२५॥ नमस्ते विश्वगर्भाश्वा
गर्भाय जितात्मने ॥ नमो हिरण्यगर्भाय हिरण्यकवचाय च ॥१२६॥ हिरण्यवर्णदेहाय हिरण्या
क्षविनाशिने ॥ हिरण्यद्रोहिं हंत्रे च हिरण्यनयनाय च ॥१२७॥ हिरण्य[illegible]से सुर्मे हिर २त
ण्यवदनाय च ॥ नमो हिरण्यशृंगाय निःसंगाय ससंगिने ॥१२८॥ भैरवाय सुकेशाय
भीषणाय अंत्रमालिने ॥ चंडाय रुंडमालाय नमो दंडधराय च ॥१२९॥ अखंडतत्त्वरू
पाय कमंडलुधराय च ॥ नमस्ते दंडसिद्धाय सर्वसिद्धाय ते नमः ॥१३०॥ नमस्ते श्वेतसिद्धा ९८
य पीतसिद्धाय ते नमः ॥ नीलसिद्धाय नीलाय रक्तसिद्धाय नमो नमः ॥१३१॥ नमो हरिद्र
सिद्धाय धूम्रसिद्धाय ते नमः ॥ मूलसिद्धाय मूलाय हरसिद्धाय ते नमः ॥१३२॥ पाताल
स्थितसिद्धाय नमः पर्वतवासिने ॥ नमो जलस्थसिद्धाय अंतरिक्षस्थिताय च ॥१३३॥

नमो स्तुते

स्व शि९

कालाग्निरुद्रसिद्धाय चंडसिद्धाय ते नमः ॥ अनंतसिद्धाय अनंतगतये नमः ॥१३४॥ नमो
विचित्रसिद्धाय बहुसिद्ध[illegible]रूपिणे ॥ अनयंकरसिद्धाय नरसिद्धाय ते नमः ॥१३५॥ नमो स्तु
श्री ऋसिद्धराजाय नारसिंहाय ते नमः ॥ सप्ताब्धिमेखलायैव सप्तसप्तिस्वरूपिणे ॥१३६॥ सप्तलो
कांतरस्थाय सप्तस्वरमयाय च ॥ सप्ताब्धिरूपदंष्ट्राय सप्ताश्वरथरूपिणे ॥१३७॥ स
प्तवायुस्वरूपाय सप्तछंदोमयाय च ॥ ~~स्वर्भाय स्वच्छरूपाय सप्तकोटिनमामय च~~ ॥ स्व
र्काय स्व[illegible]रूपाय स्वच्छंदाय नमो नमः ॥१३८॥ श्रीवसाय सुवेषाय सुकृतये सुकृतिमौ
लये ॥ सुविक्रमाय सूराय सुनगाय सुधन्विने ॥१३९॥ सुत्राय सुरनाथाय सु
प्रभाय सुनाय च ॥ सुदर्शनाय सुक्ष्माय निरूपाय नमो नमः ॥१४०॥ सुप्रभाय सुवना
वाय नवाय चिनवाय च ॥ सुशाखाय विशाखाय सुमुखाय सुखाय च ॥१४१॥ सुनख

यस्तु सुखाय च ॥ दंष्ट्राय सुरथाय सुधाय सांख्याय सुरमुख्याय प्रख्याताय प्रजा
यच ॥४२॥ नमः खड्गांगहस्ताय खेटमुद्गरधारिणे ॥ खगेंद्राय मृगेंद्राय नागेंद्राय
दृढाय च ॥४३॥ नागकेयूरहाराय नागेंद्रायाघमर्दिने ॥ नदीवासाय नग्नाय नानारू
५ पधराय च ॥४४॥ नगेश्वराय नागाय नमिताय नराय च ॥ नागांतकरथायैव नर
नारायणाय च ॥४५॥ नमो मत्स्यस्वरूपाय कच्छपाय नमो नमः ॥ नमो यज्ञवराहाय नृ
श्री सिंहाय नमो नमः ॥४६॥ विक्रमाक्रांतलोकाय वामनाय महौजसे ॥ नमो भार्गवरामा १०॥
य रावणांतकाय च ॥४७॥ नमस्ते बलरामाय कंसप्रध्वंसकारिणे ॥ बुद्धाय बुद्धरूपा
य तीक्ष्णरूपाय कल्किने ॥४८॥ आत्रेयायाग्निनेत्राय कपिलाय द्विजाय च ॥
क्षेत्राय पशुपालाय पशुवक्त्राय ते नमः ॥४९॥ गृहस्थाय वनस्थाय यतये ब्रह्मचा

रिणे ॥ स्वर्गापवर्गदात्रे च तद्भोक्त्रे च मुमुक्षवे ॥५०॥ शालग्रामनिवासाय क्षीराब्धि
शयनाय च ॥ श्रीशैलाद्रिनिवासाय शिलावासाय ते नमः ॥५१॥ योगिहृत्पद्मवासा
य महाहंसाय ते नमः ॥ गुहावासाय गुह्याय गुप्ताय गुरवे नमः ॥५२॥ नमो मूला
धिवासाय नीलवस्त्रधराय च ॥ पीतवस्त्राय शस्त्राय रक्तवस्त्रधराय च ॥५३॥ रक्त
मालाविभूषाय रक्तगंधानुलेपिने ॥ धुरंधराय धूर्ताय दुर्धर्षाय धनाय च ॥५४
दुर्मदाय दुरंताय दुर्धराय नमो नमः ॥ दुर्निरीक्ष्याय शिष्टाय दुर्दर्शाय द्रुमाय च
५५ ॥ दुर्भेदाय दुराशाय दुर्लभाय नमो नमः ॥ दृप्ताय दृप्तवक्त्राय अदृप्तनयना
य च ॥५६॥ उन्मत्ताय प्रमत्ताय नमो दैत्यारये नमः ॥ रसज्ञाय रसेशाय आरक्तर
सनाय च ॥५७॥ पथ्याय परितोषाय रथ्याय रसिकाय च ॥ ऊर्ध्वकेशोर्ध्वरूपाय नमस्ते

वोर्द्धरेतसे।५७।ऊर्द्धसिंहासिंहाय नमस्तेवोर्द्धबाहवे॥ परध्वंसकायैवशंखचक्र
धरायच॥५८॥गदापद्मधरायैवपंचबाणधरायच॥ कामेश्वरायकामायका
मपालायकामिने॥५९॥ नमःकामविहारायकामरूपधरायच॥ सोमसूर्या
ग्निनेत्राय सोमपायनमोनमः॥६१॥ नमःसोमायवामायवामदेवायतेनमः॥ ११॥
सामस्वनायसौम्यायभक्तिगम्यायवैनमः।६२॥ कूष्मांडगणनाथायसर्व
श्रेयस्करायच।भीष्मायभीकरायैवभीमविक्रमणायच॥६३॥ मृगश्रीवा
यजीवायजितायाजितकारिणे॥ जटिनेजामदग्न्यायनमस्तेजातवेदसे॥६४॥
जपाकुसुमवर्णायजप्यायजपितायच॥ जरायुजायांडजायस्वेदजायोद्भिजा
यच॥६५॥ जनार्दनायरामायजाह्नवीजनकायच॥ जराजन्मादिदूरायप्र

कमायप्रमोदिने।६६॥ जिह्वानेत्रायरुद्रायवीरभद्रायतेनमः॥ चिद्रूपायसमुद्रायकद्रु
पायप्रचेतसे।६७॥ इंद्रियायेंद्रियज्ञायनमोत्रिदशपूजायच॥ अतींद्रियायसाराय
इंदिरापतयेनमः॥६८॥ ईशानायचईशायईशितायईनायच॥ व्योमात्मनेचव्योम्ने
चनमस्तेव्योमकेशिने।६९॥ व्योमाधारायचव्योमवक्त्रायासुरघातिने॥ नमस्तेव्यो
मदंष्ट्रायव्योमवासायवैनमः॥७०॥ सुकुमारायरामायशिवमारायवैनमः॥ विश्वाय
विश्वरूपायनमोविश्वात्मकायच॥७१॥ ज्ञानात्मकायज्ञानायविश्वेशायपरमात्मने॥
एकात्मनेनमस्तुभ्यंनमस्तेद्वादशात्मने।७२॥ चतुर्विंशतिरूपायपंचविंशतिमूर्तये
षड्विंशकात्मनेनित्यंसप्तविंशत्तिकात्मने।७३॥ धर्मार्थकामयुक्तायविमुक्तायन
मोनमः॥ नावद्धशुद्धायसिद्धायसाध्यायशरणायच॥७४॥ प्रबोधायसुबोधाय

नमो बुद्धिप्रियाय च ॥ स्निग्धाय च विदग्धाय मुग्धाय मुनये नमः ७५॥ प्रियंवदाय श्रव्या
य स्रक्स्रुवाय श्रिताय च ॥ गृहेशाय महेशाय ब्रह्मेशाय नमो नमः ॥७६॥ श्रीधरा
य सुतीर्थाय हयग्रीवाय ते नमः ॥ उग्राय उग्रवेगाय उग्रकर्मरताय च ॥७७॥ उग्रनेत्रा
य व्यग्राय समग्रगुणशालिने ॥ बालग्रहविनाशाय पिशाचग्रहघातिने ॥७८॥
दुष्टग्रहनिहंत्रे च निग्रहानुग्रहाय च ॥ वृषध्वजाय वृष्याय वृषाय वृषभाय च ॥७९॥
उग्रश्रवाय शांताय नमः श्रुतिधराय च ॥ नमस्ते देवदेवेश नमस्ते मधुसूदन ॥८०॥ १२॥
नमस्ते पुंडरीकाक्ष नमस्ते दुरितक्षय ॥ नमस्ते करुणासिंधो नमस्ते समितिंजय ॥८१॥
नमस्ते नारसिंहाय नमस्ते गरुडध्वज ॥ यज्ञध्वज नमस्तेस्तु कालध्वज जयध्वज ॥८२॥
अग्निनेत्र नमस्तेस्तु नमस्ते अमरप्रियः ॥ महानेत्र नमस्तेस्तु नमस्ते भक्तवत्सल ॥८३

धर्मनेत्र नमस्तेस्तु नमस्ते करुणाकर ॥ पुण्यनेत्र नमस्तेस्तु नमस्तेभीष्टदायक ॥
८४॥ नमो नमस्ते जयसिंहरूप नमो नमस्ते वरसिंहरूप ॥ नमो नमस्ते रणसिंहरूप
नमो नमस्ते नरसिंहरूप ॥८५॥ उद्धृत्य गर्वितं दैत्यं निहत्याजौ सुरद्विषं ॥ देवकार्यं म
हत्कृत्वा गर्जसे स्वात्मतेजसा ॥८६॥ अतिरौद्रमिदं रूपं दुःसहं दुरितक्रमं ॥ दृष्ट्वा तु
शंकिताः सर्वे देवतास्त्वामुपागताः ॥८७॥ एतान्पश्य महेशानं ब्रह्माणं मां शचीपतिं ॥
दिक्पालान्द्वादशादित्यान्रुद्रानुरगराक्षसान् ॥८८॥ सर्वान्ऋषिगणान्सप्तमातृ
गौरीं सरस्वतीं ॥ लक्ष्मीं नदीश्च तीर्थानि रात्रिं भूतगणानपि ॥८९॥ प्रसीद त्वं महासिं ति
ह उग्रभावमिमं त्यज ॥ प्रकृतिस्थो न च त्वं हि शांतिभावं च धारय ॥९०॥ इत्युक्त्वा दंडव
न्मौ पपात स पितामहः ॥ प्रसीद त्वं प्रसीद त्वं प्रसीदेति पुनः पुनः ॥९१॥ मार्कंडेय उवाच

दृष्ट्वा तु देवताः सर्वाः श्रुत्वा तु ब्रह्मणो गिरं॥ स्तोत्रेणापि संहृष्टः सौम्यनाम बभाषत॥
स्या॥ श्रवणान्नारसिंहस्तु वीक्ष्य सर्वान्सुरोत्तमान्॥ श्रीनृसिंह उवाच॥ भो भो देववराः
सर्वे पितामहपुरोगमाः॥ शृणुध्वं मम वाक्यं तु भवंतु विगतज्वराः॥ २३॥ यद्धितं भवतां
नूनं तत्करिष्यामि साम्प्रतं॥ २४॥ एतन्नामसहस्रं मे त्रिसंध्यं यः पठेत्सुधीः॥ शृ
णोति वा श्रावयति पूजांते भक्तिसंयुतः॥ २५॥ सर्वान्कामानवाप्नोति जीवेत्तु शरदां श
तं॥ यो नाम भक्तिनृसिंहाद्यैरर्चयेत्क्रमशो मम॥ २६॥ सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं १३॥
सर्वपूजासु यत्प्रोक्तं तत्सर्वं लभते नरः॥ २७॥ जातिस्मरत्वं लभते ब्रह्मज्ञानं सनातनं॥
सर्वपापैर्विनिर्मुक्तो याति विष्णोः परं पदं॥ २८॥ मन्नामकवचं बध्वा विचरेद्विगतज्वरः॥
भूतवेतालकूष्मांडपिशाचब्रह्मराक्षसाः॥ २९॥ शाकिनी डाकिनी ज्येष्ठा नीला बालग्र

हादिकाः॥ दुष्टग्रहाश्च नश्यंति यक्षराक्षसपन्नगाः॥ २००॥ ये च संध्याग्रहाः सर्वे चांडालाग्रहसं
ज्ञकाः॥ निशाचरग्रहाः सर्वे पाठान्नश्यंति दूरतः॥ २०१॥ कुक्षिरोगं च हृद्रोगं शूलापस्मारमेव च॥
एकाहिकं द्व्याहिकं च चातुर्थिकमथ ज्वरं॥ २०२॥ आधयो व्याधयः सर्वे रोगा रोगाधिदेवता॥ शी
घ्रं नश्यंति ते सर्वे नृसिंहस्मरणात्सुराः॥ २०३॥ राजानो दासतां यांति शत्रवो यांति मित्रतां॥
जलानि स्थलतां यांति वह्नयो यांति शीततां॥ २०४॥ विषाण्यमृततां यांति नृसिंहस्मरणात्सु
राः॥ राज्यकामो लभेद्राज्यं धनकामो लभेत धनं॥ २०५॥ विद्याकामो लभेत्तु विद्यां बद्धो मुच्येत
बंधनात्॥ व्याघ्रव्यालभयं नास्ति चोरसर्पादिकं तथा॥ २०६॥ अनुकूला भवेद्भार्या लोकैश्च
प्रतिपूज्यते॥ सुपुत्रं धनधान्यं च पशूंश्च विविधानि च॥ २०७॥ एतत्सर्वमवाप्नोति नृसिंहस
प्रसादतः॥ जलसंतरणे चैव पर्वतारोहणे तथा॥ २०८॥ वने पि विचरन्मर्त्यो दुर्गमे विषमे प

नृसिं० राम

षि॥ तिलप्रचेशाने वापि नारसिंहमनुस्मरेत्॥२०८॥ ब्रह्मघ्नश्च पशुघ्नश्च स्वर्णहारी गुरुतल्प
गः मुच्यते सर्वपापेभ्यः कृतघ्नः स्त्रीविघातकः॥२०९॥ वेदानां दूषकश्चापि मातापितृविनि
न्दकः असत्यस्तु तथा यज्ञनिंदको लोकनिंदकः॥२११॥ स्मृत्वा सकृन्नृसिंहं तु मुच्यते सर्व
किल्बिषैः॥ बहुनात्र किमुक्तेन स्मृत्वा मां शुद्धमानसः॥२१२॥ यत्र यत्र चरेन्मर्त्यो नृसिंह
स्तत्र रक्षति॥ गच्छंस्तिष्ठन्स्वपन्भुंजन् जाग्रन्नपि हसन्नपि॥२१३॥ नृसिंहेति नृसिंहेति ५४॥
नृसिंहेति सदा स्मरन्। पुमान्नालिप्यते पापैर्भुक्तिं मुक्तिं च विंदति॥२१४॥ नारी सुभग
तामेति सौभाग्यं च सुरूपताम्॥ भर्तुः प्रियत्वं सा लब्ध्वा न वैधव्यं च विंदति॥२१५॥ न
सापत्नी च जन्मांते सम्यग्ज्ञानी द्विजो भवेत्॥ भूमिप्रदक्षिणान्मर्त्यो यत्फलं लभ
ते चिरात्॥२१६॥ तत्फलं लभते नारसिंहमूर्तिप्रदक्षिणात्॥२१७॥ मार्कंडेय उवाच

इत्युक्तो देवदेवेशो लक्ष्मीमालिंग्य लीलया॥ प्रह्लादस्याभिषेकं च ब्रह्मणे चोपदिष्ट
वान्॥ श्रीयत्तस्य प्रभावेन लोकानां च हिताय वै॥२१८॥ स्वरूपं स्थापयामास प्रकृति
स्थो भवत्तदा॥ ब्रह्मापि दैत्यराजानं प्रह्लादमभिषेचयत्॥२१९॥ दैवतैः सहितो ब्रह्मा स्वा
त्मलोकं ययौ स्वयं॥ हिरण्यकशिपोर्भीत्या प्रपलाय्य शचीपतिः॥२२०॥ स्वर्गराज्यात्परि
भ्रष्टो युगानामेकविंशतिः॥ नृसिंहेण हते दैत्ये तदा स्वर्गमवाप सः॥२२१॥ दिक्पालाश्च
सुरश्रेष्ठाः स्वं स्वं स्थानमनुत्तमं॥ धर्मे मतिः समस्तानां जनानामभवत्तदा॥२२२॥ एतं नाम
सहस्रं तु ब्रह्मणा निर्मितं पुरा॥ पुत्रानध्यापयामास सनकादीन्महामतिः॥२२३॥ अ[illegible]ते
वर्ततं सर्वलोकानां हितकाम्यया॥ देवताः सर्षयः सिद्धा यक्षविद्याधरोरगाः॥२२४॥ गं
धर्वाश्च मनुष्याश्चेहामुत्र फलैषिणः॥ अस्य स्तोत्रस्य पठनाद्विशुद्धमनसोऽभवन्
२२५

सनत्कुमारात्संप्राप्तो नारदाद्योमहामुनिः ॥ तस्मादांगिरसः प्राप्तस्तस्मात्प्राप्तो महाक्र
तुः ॥२२६॥ जयाद्भार्गवस्तस्मादग्निर्जितायनो ब्रवीत् ॥ जैगीषव्याय स प्राह सोप्यब्रवीच्च्यव
नाय सः ॥२२७॥ तस्माद्वापशांडिल्यो गार्गाय प्राह वै मुनिः ॥ क्रतुंजयाय स प्राह जातूक
र्णाय संयमी ॥२२८॥ विष्णुवृद्धाय स प्राह सोपि बौधायनाय च ॥ क्रमात्स विष्णवे प्राह स
प्राहोद्दामकुक्षये ॥२२९॥ सिंहतेजाश्च तस्माच्च श्रीप्रियाय ददौ स च ॥ उपदिष्टोस्मि ते
नाहमिदं नामसहस्रकं ॥२३०॥ तत्प्रसादादमुत्रं यस्मात्कस्माद्भयेन हि ॥ मयापि कथि १५॥
तं नारसिंहस्तोत्रमिदं तव ॥२३१॥ त्वं हि नित्यं शुचिर्भूत्वा तमाराधय शाश्वतं ॥ सर्व
भूताश्रयं देवं नृसिंहं भक्तवत्सलं ॥२३२॥ पूजयित्वा स्तवं जप्त्वा हुत्वा निश्चलमा
नसः ॥ प्राप्स्यसे महतीं सिद्धिं सर्वान्कामान्नरोत्तमान् ॥२३३॥ अयमेव परो धर्मस्त्वि

२३४
दमेव परं तपः ॥ इदमेव परं ज्ञानमिदमेव महद्व्रतं ॥ अयमेव सदाचारस्त्वयमेव महाम
खः ॥ इदमेव त्रयो वेदाः सशास्त्रा आगमानि च ॥२३५॥ नृसिंहमंत्रादन्यच्च वैदिकं तु न वि
द्यते ॥ यदस्ति तदन्यच्च यद्वास्ति न तत्क्वचित् ॥२३६॥ कथितं ते नृसिंहस्य चरितं पा
पनाशनं ॥ सर्वमंत्रमयं तापत्रयोपशमनं परं ॥ सर्वार्थसाधनं दिव्यं किं भूयः श्रोतुमि
च्छसि ॥२३७॥ श्रीनृसिंहपुराणे नृसिंहप्रवृत्तिर्नावे मार्कंडेयोपदिष्टं सर्वार्थसा
धनं नाम श्रीलक्ष्मीनृसिंहसहस्रनामस्तोत्रमंत्रः संपूर्णः ॥ श्रीनृसिंहायनमः ॥ १६॥
शिवमस्तु ॥ शुभं भवतु ॥ भूयात् नदविरंजयतु सदा श्रीनृसिंहप्रसादात्